दिनाङ्क : 21/01/2025 सायम् - 06:20

आदौ मुख्यवार्ताः

- गतरात्रौ छत्तीसगढ़-ओडिशा-सीमायां संयुक्त-अन्तरराज्य-अभियान-समये सुरक्षासैनिकैः सह जाते सङ्घर्षे न्यूनातिन्यूनं चतुर्दश-माओवादिनः मारिताः।
- प्रशासनं श्वः नवदिल्ल्यां 'बेटी बचाओ बेटी पढ़ाओ' इत्यस्याः योजनायाः दशमं वार्षिकोत्सवं परिपालयिष्यति।
- भाजपेति दलेन अद्य दिल्ली-विधानसभा-निर्वाचनाय सङ्कल्प-पत्रस्य द्वितीयभागे उल्लिखितः यत् प्रशासकीय-शैक्षणिकसंस्थासु अभिलषितछात्राणां कृते kindergarten इति शिशुविहारकक्षातः स्नातकोत्तरपर्यन्तं निःशुल्कशिक्षा भविष्यति।
- अमेरिकादेशस्य राष्ट्रपतिना डोनाल्ड् ट्रम्प् इत्यनेन व्हाइट्-हाउस इत्यत्र प्रत्यागमनस्य किञ्चित् कालाद् अनन्तरम्, जो बाइडेन् इत्यस्य अष्टसप्तति-नीतयः निरस्तीकृताः।
- अण्डर-19-महिलानां विंशतिः प्रतिविंशतिः विश्वचषकक्रिकेट्-स्पर्धायां कुआलालम्पुरे अ-वर्गस्य द्वन्द्वे भारतेन मलेशिया-दलं दशस्तोभैः पराजितम्।

अथ वार्ताः विस्तरेण

छत्तीसगढ़

गतरात्रौ छत्तीसगढ़-ओडिशा-सीमायां संयुक्त-अन्तरराज्य-अभियान-समये सुरक्षासैनिकैः सह जाते सङ्घर्षे न्यूनातिन्यूनं चतुर्दश-माओवादिनः मारिताः। छत्तीसगढ़स्य गरियाबन्ध्-जनपदस्य, ओडिशा-राज्यस्य नुआपाडा-जनपदस्य च सीमाक्षेत्रेषु एतत् अभियानम् आयोजितम् आसीत्। केन्द्रीय-गृह-मन्त्री अमितशाहः सुरक्षासेनायाः प्रयत्नानां प्रशंसाम् अकरोत्।

प्रशासनम्-"बेटी बचाओ बेटी पढ़ाओ"

प्रशासनं श्वः नवदिल्ल्यां 'बेटी बचाओ बेटी पढ़ाओ' इत्यस्याः योजनायाः दशमं वार्षिकोत्सवं परिपालयिष्यति। कार्यक्रमं बालिकानां सुरक्षा-शिक्षा-शक्तिकरणाय च कृत-प्रयासानां एकस्य दशकस्य पूर्तेः प्रतीको वर्तते। महिलाबाल-विकासमन्त्रालयेन उक्तं यत्, कार्यक्रमेऽस्मिन् सशस्त्रबलानां, अर्धसैनिकबलानां, दिल्ली-आरक्षिबलस्य महिलाधिकारिणः, छात्राः, आंगनवाड़ी-कार्यकर्तारः च भागं स्वीकरिष्यन्ति। मन्त्रालयेन उक्तं यत् आयोजनं श्वः आरभ्य मार्चमासस्य अष्टम- दिनाङ्कं यावत् प्रचलिष्यति, यस्य समापनं अन्ताराष्ट्रियमहिला-दिवसावसरे भविष्यति। एतादृशानां कार्यक्रमाणाम् आयोजनं राज्य-मण्डलीय-स्तरेऽपि भविष्यति। अवधेयं वर्तते यत् अस्याः योजनायाः आरम्भः प्रधानमन्त्रिणा नरेन्द्रमोदिना पञ्चदशोत्तरद्विसहस्र-तमवर्षस्य जनवरीमासस्य द्वाविंशति-दिनाङ्के हरियाणा- राज्यस्य पानीपतस्थले कृतम् आसीत्।

दिल्ली-विधानसभा-निर्वाचन

सप्तत्यासनेभ्यः दिल्ली-विधानसभा-निर्वाचनस्य प्रचारः प्रचण्डतया प्रचलति। विभिन्न-राजनैतिकदलानां अभ्यर्थिनः मुख्य-प्रचारकाः च मतदातॄन् आक्रष्टुं मार्ग-प्रदर्शनं जनसभाः च आयोजयन्ति। भाजपेति दलेन अद्य दिल्ली-विधानसभा-

निर्वाचनाय सङ्कल्प-पत्रस्य द्वितीयभागः प्रख्यापितः। वार्ताहरान् संसूचयन्, वरिष्ठ-भाजपानेता अनुराग ठाकुरः प्रतिस्पर्धात्मक-परीक्षाभ्यः दिल्ल्याः युवकान् पञ्चदश-सहस्ररूप्यकाणां आर्थिकसाहाय्यं प्रदातुं वचनं प्रदत्तवान्।

अनुरागठाकुरः अवदत् यत् दलं प्रशासकीय-शैक्षणिकसंस्थासु अभिलषितछात्राणां कृते kindergarten इति शिशुविहारकक्षातः स्नातकोत्तरपर्यन्तं निःशुल्कशिक्षां प्रदास्यति। असौ इत्यपि कथितवान् यत् डा.बी.आर्.अम्बेडकर-वेतन-योजनायाः अन्तर्गतं प्रौद्योगिकीय-व्यावसायिक-पाठ्यक्रमयोः अध्येतुं अनुसूचित-जाति-छात्रेभ्यः प्रतिमासं एक-सहस्र-रूप्यकाणि प्रदास्यते।

भाजपा-दलस्य सङ्कल्पपत्रस्य द्वितीयभागस्य प्रतिक्रियारूपेण आमआदमी-पार्टीति दलस्य संयोजकः अरविन्द-केजरीवालः अवदत् यत्, आप-दलस्य नेतृत्वे दिल्ली-प्रशासनेन दिल्ल्यां शिक्षां निःशुल्कं कृतम् अस्ति, प्रायः अष्टादशलक्षाः निर्धनछात्राः निःशुल्कं शिक्षां प्राप्नुवन्ति। असौ कथितवान् यत् यदि भाजपा-दलं शासनारूढः भविष्यति तर्हि एतत् दलं निःशुल्कशिक्षां, चिकित्सां, विद्युदुत्पादनं च स्थगयिष्यति।

काङ्ग्रेसदलेन आरोपितं यत् दिल्ल्याम् आम-आदमी-प्रशासनेन विगत-दशवर्षेषु दलितानां वाल्मीकि-समाजस्य च चिन्ता न कृता। दिल्ली-विधानसभा-निर्वाचनस्य मतदानं अग्रिमे मासे पञ्चमे दिनाङ्के भविष्यति, मतगणना च फरवरी-मासस्य अष्टमे दिनाङ्के भविष्यति।

विराम:

संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रम: आकाशवाण्याः अन्तर्जालपटले www.newsonair.gov.in इत्यत्र, अथ newsonair चलदूरभाषीय- तन्त्रांशे अपि उपलब्धो भविष्यति।

महाकुम्भ

सम्प्रति महाकुम्भसम्बद्धा: वार्ता: श्रूयन्ताम्। निधि: तिवारी इत्यनया सह-

कट-महाकुम्भ

विदेशमन्त्रालय – उत्तरप्रदेशप्रशासनयो: वरिष्ठाधिकारिभि: पञ्चविंशत्यधिक-द्विसहस्रतमवर्षस्य महाकुम्भस्य विविधेषु पक्षेषु चर्चार्थं वैदेशिकै: पत्रकारै: समं ह्य: नवदिल्ल्याम् एकं संवादसत्रम् समायोजितम्। अधिकारिभि: अस्य महाकुम्भस्य आध्यात्मिकस्य सांस्कृतिकस्य आर्थिकमहत्वस्य च विषये सूचना: प्रदत्ता:। अस्माकं वार्तानुसारि ब्राजीलदेशस्य रियोनगरे आयोजिते कार्निवाल-उत्सवे सप्ततिलक्षं हजयात्रायां पञ्चविंशतिलक्षं अथ च जर्मनीदेशस्य अक्टूबरफेस्ट इत्यस्मिन् ख्याते उत्सवे द्विसप्ततिलक्षसंख्यका: जना: सम्मिलिता: अभवत्। तावत् अस्मिन् क्रमे भव्ये विशाले महाकुम्भे इतोऽपि बृहत्सङ्ख्यायां तीर्थयात्रिण: श्रद्धालव: आगन्तुं शक्नुवन्ति। प्रशासनेन अत्रावधौ अस्मिन् महाकुम्भे पञ्चचत्वारिंशत्कोट्यधिक-सङ्ख्यकानां श्रद्धालूनाम् आगमनस्य अनुमान: प्रकल्पित:। यस्मिन् भूयोऽपि पञ्चदशलक्षसङ्ख्यका: वैदेशिका: पर्यटका: सम्मिलिता: भविष्यन्ति। अपरत्र उत्तरप्रदेशस्य मेलापकप्राधिकरणेन मौनीअमावस्याया: स्नानमहोत्सवस्य सुरक्षितया सञ्चालनार्थं व्यापकीरणनीति: निर्मितास्ति। सूचनेयं मङ्गलवासरे वरिष्ठारक्षकाधिक: राजेश-द्विवेदिना प्रदत्ता। (संस्कृतवार्ताकक्षत: निधि:तिवारी)

डोनाल्ड् ट्रम्प

अमेरिकादेशस्य राष्ट्रपतिना डोनाल्ड् ट्रम्प् इत्यनेन व्हाइट्-हाउस इत्यत्र प्रत्यागमनस्य किञ्चित् कालाद् अनन्तरम्, जो बाइडेन् इत्यस्य अष्टसप्तति-नीतयः निरस्तीकृताः। वार्ताहरान् संसूचयन् असौ विश्वस्वास्थ्य-सङ्घटनात् निवृत्तेः अनेकानि

कारणानि उल्लिखितवान्। अनेन आरोपितं यत् विश्वस्वास्थ्य-सङ्घटनं कोविड्-महामार्याः प्रकोपसमये कथं मार्गनिर्देशम् अददात् इत्येतस्मिन् विषये चीनदेशम् प्रति पक्षपाती आसीत्।

कोलकाता- आर.जी.कर

पश्चिमबङ्गालस्य प्रशासनम् अद्य आर.जी.कर-दुष्कर्म-हत्या-प्रकरणस्य दोषी सञ्जय-राय इत्यस्य मृत्युदण्डाय कोलकाता-उच्चन्यायालयः समभ्यागतः। कोलकातायाः सियालदह-नगरस्य सत्र-न्यायालयेन ह्यः अस्मिन् प्रकरणे सञ्जय-राय इत्यस्मै आजीवन-कारावासस्य दण्डः प्रदत्तः आसीत्। सहैव न्यायालयेन पीडितायाः परिवाराय सप्तदशलक्ष-रूप्यकाणि प्रदातुं राज्यप्रशासनाय निर्देशः दत्तः। स्नातकोत्तर-प्रशिक्षु-चिकित्सकायाः मृतशरीरः गतवर्षे अगस्त-मासे कोलकातायाः आर.जी.कर-चिकित्सकीय-महाविद्यालयस्य सम्मेलनकक्षे प्राप्तः आसीत्। राज्यस्य महाधिवक्ता किशोरदत्तः अद्य अयं विषयम् आलक्ष्य न्यायमूर्तिः देबाङ्शुः बसक् न्यायमूर्तिः शब्बर् रशिदी इत्येताभ्यां सह मिलितवान्। न्यायपीठं राज्यप्रशासनस्य याचिकां स्वीकृतवान्।

भारतऋतुविभाग

भारतऋतु-विभागेन आगामिदिनद्वये पश्चिम-हिमालयीय-क्षेत्रे वृष्टेः हिमपातस्य च पूर्वानुमानं कृतम्। अस्मिन् पञ्जाब, हरियाणा, चण्डीगढ, पश्चिमोत्तरप्रदेश, राजस्थान, पश्चिममध्यप्रदेशेषु वृष्टेः सम्भावना प्रकटितास्ति। श्वः हिमाचलप्रदेशे, उत्तराखण्डे, पश्चिमोत्तरप्रदेशे च विद्युद्-द्योतनेन सह वृष्टेः सम्भावना विद्यते। ऋतुविभागेन आगामिषु अष्टचत्वारिंशत्-होरासु पूर्वोत्तर-मध्यभारतस्य भूमिगतक्षेत्रेषु न्यूनतम-तापमाने प्रायः द्वि डिग्री सेल्सियस-मिता वृद्धिः अपि भविष्यति इति पूर्वानुमानितम्। पूर्वोत्तरप्रदेशानां केषुचित् क्षेत्रेषु शुक्रवारपर्यन्तं रात्रौ प्रातः च सघन कुज्झटिकायाः स्थितिः प्रचलिष्यति इति सम्भाव्यते। बिहार, पश्चिमबङ्गाल, झारखण्ड, असम, मेघालय, राजस्थान, ओडिशा राज्याणां च केषुचित् भागेषु सघन-निहारस्य स्थितिः निरन्तरं भवितुं शक्नोति।

क्रिकेट्

अण्डर-19-महिलानां विंशतिः प्रतिविंशतिः विश्वचषकक्रिकेट्-स्पर्धायां कुआलालम्पुरे अ-वर्गस्य द्वन्द्वे गतविजेत्रा भारतेन मलेशिया-दलं दशस्तोभैः पराजितम्।

।। इति वार्ता:।।